॥ श्री गुरुभ्यो नमः हरिः ॐ ॥

# अथ दीपावली लक्ष्मी पूजा

*प्रार्थना*

शुक्लांभरधरं विष्णुं शशिवर्णं चातुर्भुजं ।
प्रसन्न वदनं ध्यायेत् सर्वविघ्नोप शान्तये ॥
वक्रतुण्ड महाकाय कोटिसुर्य समप्रभ ।
निर्विघ्नं कुरुमे देव सर्व कार्येषु सर्वदा ॥

*घण्टानाद*

आगमार्थं तु देवानां गमनार्थं तु रक्षसां ।
कुर्वे घण्टारवं तत्र देवताह्वावान लाञ्चनं ॥

*महागणपति पूजा*

ॐ सुमुखाय नमः । ॐ एकदन्ताय नमः । ॐ कपिलाय नमः ।
ॐ गजकर्णकाय नमः । ॐ लंबोदराय नमः । ॐ विकटाय नमः ।
ॐ विघ्नराजाय नमः । ॐ गणाध्यक्षाय नमः । ॐ धूमकेतवे नमः ।
ॐ गणाधिपाय नमः । ॐ भालचन्द्राय नमः । ॐ गजाननाय नमः ।
ॐ श्री महागणपतये नमः – नाम पूजां समर्पयामि ।
ॐ श्री महागणपतये नमः – पुष्पाणि समर्पयामि ।
ॐ श्री महागणपतये नमः – धूपमाघ्रापयामि समर्पयामि ।
ॐ श्री महागणपतये नमः – एकार्ति दीपं दर्शयामि ।
ॐ श्री महागणपतये नमः – नैवेद्यं समर्पयामि ।
ॐ श्री महागणपतये नमः – मङ्गल नीराजनं दर्शयामि ।

*संकल्पम्*

प्रणवस्य परब्रह्म ऋषिः परमात्मा देवता दैवी गायत्री छन्दः प्राणायामे विनियोगः
ॐ भूः ॐ भुवः ॐ सुवः ॐ महः ॐ जनः ॐ तपः ॐ सत्यं
ॐ तत्सवितुर्वरेण्यं भर्गो दवस्य धीमहि । धियो यो नः प्रचोदयात् ॥

ॐ आपः ज्योतिरसः अमृतं ब्रह्म भूर्भुवस्सुवरोम् ||
ममोपात्त दुरित क्षयद्वारा अस्माकं सह कुटुम्बानां
क्षेम स्थैर्य वीर्य विजय विद्या विनय वैराग्य आयुः आरोग्य ऐश्वर्य अभिवृध्यर्थं
धर्मार्थ काममोक्ष चतुर्विध फल पुरुषार्थ सिध्द्यर्थं
सत्सन्तान सौभाग्य शुभफला अवाप्यर्थं
महालक्ष्मी देवतामुद्दिश्य महालक्ष्मी देवता प्रीत्यर्थं
दीपावली पञ्चरात्र अमावास्यां षोडशोपचार पूजा आराधनं करिष्ये |

*ध्यानं*

ॐ हिरण्यवर्णां हरिणीं सुवर्ण रजतस्रजाम् |
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ||
या सा पद्मासनस्था विपुलकटितटी पद्मपत्रायताक्षी |
गम्भीरावर्तनाभिस्तनभरनमित शुभ्रवस्त्रोत्तरीया ||
श्री महालक्ष्म्यै नमः ध्यानं समर्पयामि

*आवाहनं*

तां म आवह जातवेदो लक्ष्मीमनपगामिनीम् |
यस्यां हिरण्यं विन्देयं गामश्वं पुरुषानहम् ||
आवाहयामि कमले आदृतां देवदानवैः |
विष्णुप्रिये महादेवि नित्यं सन्नीहितोभव ||
श्री महालक्ष्म्यै नमः आवाहनं समर्पयामि

*आसनं*

अश्वपूर्वां रथमध्यां हस्तिनादप्रबोधिनीम् |
श्रियं देवीमुपह्वये श्रीर्मा देवी जुषताम् ||
हेमसिम्हासने रम्ये दिव्यमौक्तिक संयुते |
इन्द्रनीलादि खचिते संविश्वसुरेश्वरी ||
श्री महालक्ष्म्यै नमः सिंहासनं समर्पयामि

*पाद्यं*

कां सोस्मितां हिरण्यप्राकारामार्द्रां ज्वलन्तीं तृप्तां तर्पयन्तीम् ।
पद्मेस्थितां पद्मवर्णां तामिहोपह्वये श्रियम् ॥
तप्तकाञ्चन संकाशे महालक्ष्मी वरप्रदे ।
पाद्यं गृहाण देवीत्वं महालक्ष्मी नमोस्तुते ॥
श्री महालक्ष्म्यै नमः पादयोः पाद्यं समर्पयामि

*अर्घ्यं*

चन्द्रां प्रभासां यशसा ज्वलन्तीं श्रियम् लोके देवजुष्टामुदाराम् ।
तां पद्मिनीमीं शरणमहं प्रपद्येऽलक्ष्मीर्मे नश्यतां त्वां वृणे ॥
क्षीरोदार्णव संभूते महालक्ष्मी वरप्रदे ।
सुवर्णकलशान्वितं स्वीकुरुष्व अर्घ्यमुत्तमम् ॥
श्री महालक्ष्म्यै नमः हस्तयोः अर्घ्यं समर्पयामि

*आचामनियं*

आदित्यवर्णे तपसोऽधिजातो वनस्पतिस्तव वृक्षोऽथ बिल्वः ।
तस्य फलानि तपसा नुदन्तु मायान्तरायाश्च बाह्या अलक्ष्मीः ॥
सर्वमङ्गल माङ्गल्ये पद्मनेत्रे हरिप्रिये ।
गृहाणाचमनं देवी स्वीएकुरुश्व सुरेश्वरी ॥
श्री महालक्ष्म्यै नमः मुखे आचामनियं समर्पयामि

*मधुपर्कं*

नारायण प्रिये देवी मधुनासहितं दधि ।
मधुपर्कं मयानीतं गृहाण परमेश्वरी ॥
श्री महालक्ष्म्यै नमः मधुपर्कं समर्पयामि

*पञ्चामृतं स्नानीयं च*

उपैतु मां देवसखः कीर्तिश्च मणिना सह ।
प्रादुर्भूतोऽस्मि राष्ट्रेस्मिन् कीर्तिमृद्धिं ददातु मे ॥
पूर्णेन्दु बिम्ब वदने पयोदधि घृतं मधु ।

शर्करासहितं देवी स्नानं पञ्चामृतैः शुभैः ॥
श्री महालक्ष्म्यै नमः पञ्चामृतं स्नानीयं च समर्पयामि

*शुद्धोदक स्नानीयं*
गङ्गाजल समानीतं सुवर्ण कलशस्तिथम् ।
शुद्धोदकमिदं देवी स्नानार्थं प्रतिगृह्यताम् ॥
श्री महालक्ष्म्यै नमः शुद्धोदक स्नानीयं समर्पयामि

*वस्त्रं*
क्षुत्पिपासामलां ज्येष्टामलक्ष्मीं नाशयाम्यहम् ।
अभूतिमसमृद्धिं च सर्वां निर्णुद मे गृहात् ॥
देवानामद्भुतं दिव्यं स्वर्णतन्तु विनिर्मितं ।
वस्त्रयुग्मेमयादत्तं गृहाण हरिवल्लभे ॥
श्री महालक्ष्म्यै नमः वस्त्रं समर्पयामि

*यज्ञोपवीतं*
राजतं ब्रह्मसूत्रं च कान्चानं सुमनोहरम् ।
यज्ञोपवीतं वरदे गृहाण परमेश्वरी ॥
श्री महालक्ष्म्यै नमः यज्ञोपवीतं समर्पयामि

*दिव्याभरणानि*
किरीटहार केयूर कङ्कणा भुजभूषणैः ।
मुक्तामाणिक्यहारैश्च कटिसंस्थित नूपुरैः ॥
कन्चुकं स्वर्णवर्णाढ्यं नवरत्नविनिर्मितं ।
सर्वसौख्यप्रदे देवी गृहाण सुरवन्दिते ॥
रत्नताटङ्क विमले मुखभूषण भूषिते ।
भूषणानि ददाम्यद्य गृहाण सुरपूजिते ॥
श्री महालक्ष्म्यै नमः दिव्याभारणनि समर्पयामि

*गन्ध*

गन्धद्वारां दुराधर्षां नित्यपुष्टाम् करीशिणीं ।
ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् ॥
कर्पूरगन्ध सम्मिश्रं कस्तूरी कुङ्कुमान्वितम् ।
श्रीगन्धंते प्रदास्यामि कीर्तिम्वृद्धिम् कुरुश्वमे ॥
श्री महालक्ष्म्यै नमः दिव्य परिमळ गन्धान् समर्पयामि

*हरिद्रा कुंकुम चूर्णं*

मनसः काममाकूतिं वाचस्सत्यमशीमहि ।
पशूनां रूपमन्नस्य मयि श्रीः श्रयतां यशः ॥
अक्षतान् श्वेतवर्णांश्च शुद्धमौक्तिक संन्निभान् ।
अहं दास्यामि कमले अक्षय्य फलदायिनी ॥
श्री महालक्ष्म्यै नमः हरिद्रा कुंकुम चूर्णं समर्पयामि

*पुष्पमाला*

कर्दमेन प्रजाभूता मयि संभव कर्दम ।
श्रियं वासय मे कुले मातरं पद्ममालिनीम् ॥
मन्दारैः पारिजाताद्यैः पाटलाशोकचंपकैः ।
करवीरैश्च पुन्नागैः अर्चयामि सुरेश्वरि ॥
श्री महालक्ष्म्यै नमः नानाविध पुष्पाणि समर्पयामि

*नामपूजाम्*

कमलायै नमः । विमलायै नमः । विष्णुप्रियायै नमः ।
गरुडध्वजायै  नमः । सर्वमन्त्रफलदायिन्यै नमः ।
सर्वदेवनमस्कृतायै नमः । त्रिकालसंपन्नायै नमः ।
विष्णु शक्त्यै नमः । अष्टान्गयोगिन्यै  नमः ।
सर्वतीर्थफलप्रदायै नमः । चन्द्रसोदर्यै नमः ।
अकारादि क्षकारान्त स्वरूपिण्यै नमः ।
त्रिलोकमात्रे नमः । शुद्धायै नमः ।


©swaadhyaayee@gmail.com

वेदशास्त्र प्रमाणस्वरूपिण्यै नमः | सर्वोपद्रव नाशिन्यै नमः |
वाञ्छितार्थ फलप्रदायिन्यै नमः | सुरेश्वर्यै नमः |
पद्ममुखायै नमः | अनेकरूपिण्यै नमः | मण्डलायै नमः |
क्षीराब्धि तनयायै नमः | विशालाक्ष्यै नमः |
शुद्धस्फटिकसन्नीभायै नमः | सोमसूर्यग्नि लोचनायै नमः |
इन्दिरायै नमः | धीर्घकेशिन्यै नमः |
दारिद्र्यनाशिन्यै नमः | श्री महालक्ष्म्यै नमः ||
श्री महालक्ष्म्यै नमः नामपूजाम् समर्पयामि

*अष्टोत्तर - महालक्ष्मि अष्टोत्तर*
श्री महालक्ष्म्यै नमः अष्टोत्तर शत नाम पूजां समर्पयामि |

*धूपम्*
आपः सृजन्तु स्निग्धानि चिक्लीत वस मे गृहे |
नि च देवीं मातरं श्रियं वासय मे कुले ||
चन्दनागरु कर्पूरैः तिला गुग्गुल संयुतं |
कपिलाघृत संयुक्तं नमो मन्गलदायिनी ||
श्री महालक्ष्म्यै नमः चन्दनाखिल तिक्तागरु कर्पूर धूपमाघ्रापयामि

*दीपम्*
आर्द्रां पुष्करिणीं पुष्टिं पिङ्गलां पद्ममालिनीम् |
चन्द्राम् हिरण्मयीं लक्ष्मीं जातवेदो म आवह ||
श्वेतसूत्रकृतंवर्ति कर्पूराज्येन संयुतम् |
दीपं सुज्वलितं ग्राह्यं मङ्गलानि प्रयच्छमे ||
श्री महालक्ष्म्यै नमः दीपं दर्शयामि |

*नैवेद्यं*
नैवेद्यं षड्रसोपेतं घृत पक्व समन्वितं |
परमान्नानि भक्ष्याणि नैवेद्यं प्रतिगृह्यताम् ||

ॐ अमृतमस्तु अमृतोपस्थरणमसि स्वाहा ||
ॐ प्राणाय स्वाहा | ॐ अपानाय स्वाहा | ॐ व्यानाय स्वाहा |
ॐ उदानाय स्वाहा | ॐ समानाय स्वाहा | ॐ ब्रह्मणे स्वाहा ||
श्री महालक्ष्म्यै नमः नैवेद्यं समर्पयामि |

*नीराजनं*

आर्द्रां यः करिणीं यष्टिं सुवर्णां हेममालिनीम् |
सूर्यां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ||
नीराजनं प्रदास्यामि भक्त्याभीष्ट वरप्रदे |
दशवर्ति समायुक्तं दर्शयाम्यमरेश्वरी ||
श्री महालक्ष्म्यै नमः कर्पूर नीराजनं समर्पयामि |

*मन्त्रपुष्पं*

**दुर्गासूक्तं**
**देवीसूक्तं**
श्री महालक्ष्म्यै नमः मन्त्रपुष्पं समर्पयामि |

*प्रार्थना*

नानापुष्प समायुक्तं मुक्ताहारैर्विराजितम् |
पुष्पाञ्जलिं प्रदास्यामि वरदे भक्तवत्सले ||
आयुर्देहि यशोदेहि सौभाग्यं देहि मन्दिरे |
हेमसिम्हासने देवी ममसन्तु मनोरथा ||
श्री महालक्ष्म्यै नमः मनसोभीष्ठ प्रार्थनान् समर्पयामि |

*प्रदक्षिण नमस्कार*

प्रदक्षिणं करोमित्वा सर्वाभीष्ट फलप्रदे |
नमस्कारं करिष्यामि व्रतं देवी तवभक्ति परायणा ||
यानि कानि च पापानि जन्मान्तर कृतानि च | तानि तानि विनश्यन्ति प्रदक्षिण पदे पदे ||
श्री महालक्ष्म्यै नमः प्रदक्षिण नमस्कारान् समर्पयामि |


©swaadhyaayee@gmail.com

*क्षमापणम्*

आवाहनं न जानामि न जानामि विसर्जनम् |
पूजां चैव न जानामि क्षमस्व परमोत्तम ||
अन्यथा शरणं नास्ति त्वमेव शरणं मम |
तस्मात् कारुण्य भावेन रक्ष रक्ष हरिवल्लभे ||

*उद्यापनम्*

यज्ञेन यज्ञमयजन्त देवाः तानिधार्माणि प्रथमान्यासन् |
ते ह नाकं महिमानः सचन्ते यत्र पूर्वे साध्यास्सन्ति देवाः ||

*प्रायश्चित्त*

कायेन वाचा मनसेन्द्रियैर्वा बुद्ध्यात्मनावा प्रकृत्यै स्वभावात् करोमि यद्यत् सकलं परस्मै श्रीमन्नरायणायेति समर्पयामि |

ॐ पूर्णमदः पूर्णमिदं पूर्णात् पूर्णमुदच्यते |
पूर्णस्य पूर्णमादाय पूर्णमेव अवशिष्यते ||

ॐ शान्तिः शान्तिः शान्तिः ||

|| हरिः ॐ ||

|| श्री गुरुभ्यो नमः हरिः ॐ ||

# *atha dīpāvalī lakṣmī pūjā*

*prārthanā*
**śuklāṃbharadharaṃ viṣṇuṃ śaśivarṇaṃ cāturbhujaṃ |**
**prasanna vadanaṃ dhyāyet sarvavighnopa śāntaye ||**

**vakratuṇḍa mahākāya koṭisurya samaprabha |**

**nirvighnaṃ kurume deva sarva kāryeṣu sarvadā ||**

*ghaṇṭānāda*
**āgamārthaṃ tu devānāṃ gamanārthaṃ tu rakṣasāṃ |**
**kurve ghaṇṭāravaṃ tatra devatāhvāvāna lāñcanaṃ ||**

*mahāgaṇapati pūjā*
**oṃ sumukhāya namaḥ | oṃ ekadantāya namaḥ | oṃ kapilāya namaḥ |**
**oṃ gajakarṇakāya namaḥ | oṃ laṃbodarāya namaḥ | oṃ vikaṭāya namaḥ |**
**oṃ vighnarājāya namaḥ | oṃ gaṇādhyakṣāya namaḥ | oṃ dhūmaketave namaḥ |**
**oṃ gaṇādhipāya namaḥ | oṃ bhālacandrāya namaḥ | oṃ gajānanāya namaḥ |**

oṃ śrī mahāgaṇapataye namaḥ – nāma pūjāṃ samarpayāmi |

oṃ śrī mahāgaṇapataye namaḥ – puṣpāṇi samarpayāmi |

oṃ śrī mahāgaṇapataye namaḥ – dhūpamāghrāpayāmi |

oṃ śrī mahāgaṇapataye namaḥ – ekārti dīpaṃ darśayāmi |

oṃ śrī mahāgaṇapataye namaḥ – naivedyaṃ samarpayāmi |

oṃ śrī mahāgaṇapataye namaḥ – maṅgala nīrājanaṃ darśayāmi |

*saṃkalpam*
**praṇavasya parabrahma ṛṣiḥ paramātmā devatā daivī gāyatrī chandaḥ prāṇāyāme viniyogaḥ**
**oṃ bhūḥ oṃ bhuvaḥ oṃ suvaḥ oṃ mahaḥ oṃ janaḥ oṃ tapaḥ oṃ satyaṃ**
**oṃ tatsaviturvareṇyaṃ bhargo davasya dhīmahi | dhiyo yo naḥ pracodayāt ||**

**oṃ āpaḥ jyotirasaḥ amṛtaṃ brahma bhūrbhuvassuvarom ||**

**mamopātta durita kṣayadvārā asmākaṃ saha kuṭumbānāṃ**
**kṣema sthairya vīrya vijaya vidyā vinaya vairāgya āyuḥ ārogya aiśvarya abhivṛdhyarthaṃ**
**dharmārtha kāmamokṣa caturvidha phala puruṣārtha sidhdyarthaṃ**
**satsantāna saubhāgya śubhaphalā avāpyarthaṃ**
**mahālakṣmī devatāmuddiśya mahālakṣmī devatā prītyarthaṃ**
**dīpāvalī pañcarātra amāvāsyāṃ ṣoḍaśopacāra pūjā ārādhanaṃ kariṣye |**

*dhyānaṃ*
**oṃ hiraṇyavarṇāṃ hariṇīṃ suvarṇa rajatasrajām |**
**candrāṃ hiraṇmayīṃ lakṣmīṃ jātavedo ma āvaha ||**

**yā sā padmāsanasthā vipulakaṭitaṭī padmapatrāyatākṣī |**
**gambhīrāvartanābhistanabharanamita śubhravastrottarīyā ||**

śrī mahālakṣmyai namaḥ dhyānaṃ samarpayāmi

*āvāhanaṃ*
**tāṃ ma āvaha jātavedo lakṣmīmanapagāminīm |**
**yasyāṃ hiraṇyaṃ vindeyaṃ gāmaśvaṃ puruṣānaham ||**

**āvāhayāmi kamale ādṛtāṃ devadānavaiḥ |**
**viṣṇupriye mahādevi nityaṃ sannīhitobhava ||**

śrī mahālakṣmyai namaḥ āvāhanaṃ samarpayāmi

*āsanaṃ*
**aśvapūrvāṃ rathamadhyāṃ hastinādaprabodhinīm |**
**śriyaṃ devīmupahvaye śrīrmā devī juṣatām ||**

**hemasimhāsane ramye divyamauktika saṃyute |**
**indranīlādi khacite saṃviśvasureśvarī ||**

śrī mahālakṣmyai namaḥ siṃhāsanaṃ samarpayāmi

*pādyaṃ*
**kāṃ sosmitāṃ hiraṇyaprākārāmārdrāṃ jvalantīṃ tṛptāṃ tarpayantīm |**
**padmesthitāṃ padmavarṇāṃ tāmihopahvaye śriyam ||**

**taptakāñcana saṃkāśe mahālakṣmī varaprade |**
**pādyaṃ gṛhāṇa devītvaṃ mahālakṣmī namostute ||**

śrī mahālakṣmyai namaḥ pādayoḥ pādyaṃ samarpayāmi

*arghyaṃ*
**candrāṃ prabhāsāṃ yaśasā jvalantīṃ śriyam loke devajuṣṭāmudārām |**
**tāṃ padminīmīṃ śaraṇamahaṃ prapadyeslakṣmīrme naśyatāṃ tvāṃ vṛṇe ||**

**kṣīrodārṇava saṃbhūte mahālakṣmī varaprade |**
**suvarṇakalaśānvitaṃ svīkuruṣva arghyamuttamam ||**

śrī mahālakṣmyai namaḥ hastayoḥ arghyaṃ samarpayāmi

*ācāmaniyaṃ*
**ādityavarṇe tapasosdhijāto vanaspatistava vṛkṣostha bilvaḥ |**
**tasya phalāni tapasā nudantu māyāntarāyāśca bāhyā alakṣmīḥ ||**

**sarvamaṅgala māṅgalye padmanetre haripriye |**
**gṛhāṇācamanaṃ devī svīekuruśva sureśvarī ||**

śrī mahālakṣmyai namaḥ mukhe ācāmaniyaṃ samarpayāmi

*madhuparkaṃ*
**nārāyaṇa priye devī madhunāsahitaṃ dadhi |**
**madhuparkaṃ mayānītaṃ gṛhāṇa parameśvarī ||**

śrī mahālakṣmyai namaḥ madhuparkaṃ samarpayāmi

*pañcāmṛtaṃ snānīyaṃ*
**upaitu māṃ devasakhaḥ kīrtiśca maṇinā saha |**
**prādurbhūtossmi rāṣṭresmin kīrtimṛddhiṃ dadātu me ||**

**pūrṇendu bimba vadane payodadhi ghṛtaṃ madhu |**
**śarkarāsahitaṃ devī snānaṃ pañcāmṛtaiḥ śubhaiḥ ||**

śrī mahālakṣmyai namaḥ pañcāmṛtaṃ snānīyaṃ ca samarpayāmi

*śuddhodaka snānīyaṃ*
**gaṅgājala samānītaṃ suvarṇa kalaśastitham |**
**śuddhodakamidaṃ devī snānārthaṃ pratigṛhyatām ||**

śrī mahālakṣmyai namaḥ śuddhodaka snānīyaṃ samarpayāmi

*vastraṃ*
**kṣutpipāsāmalāṃ jyeṣṭāmalakṣmīṃ nāśayāmyaham |**
**abhūtimasamṛddhiṃ ca sarvāṃ nirṇuda me gṛhāt ||**

**devānāmadbhutaṃ divyaṃ svarṇatantu vinirmitaṃ |**
**vastrayugmemayādattaṃ gṛhāṇa harivallabhe ||**

śrī mahālakṣmyai namaḥ vastraṃ samarpayāmi

*yajñopavītaṃ*
**rājataṃ brahmasūtraṃ ca kāncānaṃ sumanoharam |**
**yajñopavītaṃ varade gṛhāṇa parameśvarī ||**

śrī mahālakṣmyai namaḥ yajñopavītaṃ samarpayāmi

*divyābharaṇāni*
**kirīṭahāra keyūra kaṅkaṇā bhujabhūṣaṇaiḥ |**
**muktāmāṇikyahāraiśca kaṭisaṃsthita nūpuraiḥ ||**

**kancukaṃ svarṇavarṇāḍhyaṃ navaratnavinirmitaṃ |**
**sarvasaukhyaprade devī gṛhāṇa suravandite ||**

**ratnatāṭaṅka vimale mukhabhūṣaṇa bhūṣite |**
**bhūṣaṇāni dadāmyadya gṛhāṇa surapūjite ||**

śrī mahālakṣmyai namaḥ divyābhāraṇani samarpayāmi

*gandha*
**gandhadvārāṃ durādharṣāṃ nityapuṣṭām karīśiṇīṃ |**
**īśvarīṃ sarvabhūtānāṃ tāmihopahvaye śriyam ||**

**karpūragandha sammiśraṃ kastūrī kuṅkumānvitam |**
**śrīgandhaṃte pradāsyāmi kīrtimvṛddhim kuruśvame ||**

śrī mahālakṣmyai namaḥ divya parimala gandhān samarpayāmi

*haridrā kuṃkuma cūrṇaṃ*
**manasaḥ kāmamākūtiṃ vācassatyamaśīmahi |**
**paśūnāṃ rūpamannasya mayi śrīḥ śrayatāṃ yaśaḥ ||**

**akṣatān śvetavarṇāṃśca śuddhamauktika saṃnnibhān |**
**ahaṃ dāsyāmi kamale akṣayya phaladāyinī ||**

śrī mahālakṣmyai namaḥ haridrā kuṃkuma cūrṇaṃ samarpayāmi

*puṣpamālā*
**kardamena prajābhūtā mayi saṃbhava kardama |**
**śriyaṃ vāsaya me kule mātaraṃ padmamālinīm ||**

**mandāraiḥ pārijātādyaiḥ pāṭalāśokacaṃpakaiḥ |**
**karavīraiśca punnāgaiḥ arcayāmi sureśvari ||**

śrī mahālakṣmyai namaḥ nānāvidha puṣpāṇi samarpayāmi

*nāmapūjām*
**kamalāyai namaḥ | vimalāyai namaḥ | viṣṇupriyāyai namaḥ |**
**garuḍadhvajāyai namaḥ | sarvamantraphaladāyinyai namaḥ |**
**sarvadevanamaskṛtāyai namaḥ | trikālasaṃpannāyai namaḥ |**
**viṣṇu śaktyai namaḥ | aṣṭāṅgayoginnyai namaḥ |**
**sarvatīrthaphalapradāyai namaḥ | candrasodaryai namaḥ |**
**akārādi kṣakārānta svarūpiṇyai namaḥ |**
**trilokamātre namaḥ | śuddhāyai namaḥ |**
**vedaśāstra pramāṇasvarūpiṇyai namaḥ | sarvopadrava nāśinyai namaḥ |**
**vāñchitārtha phalapradāyinyai namaḥ | sureśvaryai namaḥ |**
**padmamukhāyai namaḥ | anekarūpiṇyai namaḥ | maṇḍalāyai namaḥ |**
**kṣīrābdhi tanayāyai namaḥ | viśālākṣyai namaḥ |**
**śuddhasphaṭikasannībhāyai namaḥ | somasūryagni locanāyai namaḥ |**
**indirāyai namaḥ | dhīrghakeśinyai namaḥ |**
**dāridryanāśinyai namaḥ | śrī mahālakṣmyai namaḥ ||**

śrī mahālakṣmyai namaḥ nāmapūjām samarpayāmi

*aṣṭottara*

**śrī mahālakṣmi aṣṭottara**

śrī mahālakṣmyai namaḥ aṣṭottara śata nāma pūjāṃ samarpayāmi |

*dhūpam*
**āpaḥ sṛjantu snigdhāni ciklīta vasa me gṛhe |**
**ni ca devīṃ mātaraṃ śriyaṃ vāsaya me kule ||**

**candanāgaru karpūraiḥ tilā guggula saṃyutaṃ |**
**kapilāghṛta saṃyuktaṃ namo mangaladāyinī ||**

śrī mahālakṣmyai namaḥ candanākhila tiktāgaru karpūra dhūpamāghrāpayāmi

*dīpam*
**ārdrāṃ puṣkariṇīṃ puṣṭiṃ piṅgalāṃ padmamālinīm |**
**candrām hiraṇmayīṃ lakṣmīṃ jātavedo ma āvaha ||**

**śvetasūtrakṛtaṃvarti karpūrājyena saṃyutam |**
**dīpaṃ sujvalitaṃ grāhyaṃ maṅgalāni prayacchame ||**

śrī mahālakṣmyai namaḥ dīpaṃ darśayāmi |

*naivedyaṃ*
**naivedyaṃ ṣaḍrasopetaṃ ghṛta pakva samanvitaṃ |**
**paramānnāni bhakṣyāṇi naivedyaṃ pratigṛhyatām ||**

**oṃ amṛtamastu amṛtopastharaṇamasi svāhā ||**

**oṃ prāṇāya svāhā | oṃ apānāya svāhā | oṃ vyānāya svāhā |**
**oṃ udānāya svāhā | oṃ samānāya svāhā | oṃ brahmaṇe svāhā ||**

śrī mahālakṣmyai namaḥ naivedyaṃ samarpayāmi |

*nīrājanaṃ*
**ārdrāṃ yaḥ kariṇīṃ yaṣṭiṃ suvarṇāṃ hemamālinīm |**
**sūryāṃ hiraṇmayīṃ lakṣmīṃ jātavedo ma āvaha ||**

**nīrājanaṃ pradāsyāmi bhaktyābhīṣṭa varaprade |**
**daśavarti samāyuktaṃ darśayāmyamareśvarī ||**

śrī mahālakṣmyai namaḥ karpūra nīrājanaṃ samarpayāmi |

*mantrapuṣpaṃ*
**durgāsūktaṃ**
**devīsūktaṃ**
śrī mahālakṣmyai namaḥ mantrapuṣpaṃ samarpayāmi |

*prārthanā*
**nānāpuṣpa samāyuktaṃ muktāhārairvirājitam |**
**puṣpāñjaliṃ pradāsyāmi varade bhaktavatsale ||**

**āyurdehi yaśodehi saubhāgyaṃ dehi mandire |**
**hemasimhāsane devī mamasantu manorathā ||**

śrī mahālakṣmyai namaḥ manasobhīṣṭha prārthanān samarpayāmi |

*pradakṣiṇa namaskāra*
**pradakṣiṇaṃ karomitvā sarvābhīṣṭa phalaprade |**
**namaskāraṃ kariṣyāmi vrataṃ devī tavabhakti parāyaṇā ||**

**yāni kāni ca pāpāni janmāntara kṛtāni ca | tāni tāni vinaśyanti pradakṣiṇa pade pade ||**

śrī mahālakṣmyai namaḥ pradakṣiṇa namaskārān samarpayāmi |

*kṣamāpaṇam*
**āvāhanaṃ na jānāmi na jānāmi visarjanam |**
**pūjāṃ caiva na jānāmi kṣamasva paramottama ||**

**anyathā śaraṇaṃ nāsti tvameva śaraṇaṃ mama |**

**tasmāt kāruṇya bhāvena rakṣa rakṣa harivallabhe ||**

*udyāpanam*
**yajñena yajñamayajanta devāḥ tānidhārmāṇi prathamānyāsan |**
**te ha nākaṃ mahimānaḥ sacante yatra pūrve sādhyāssanti devāḥ ||**

*prāyaścitta*
**kāyena vācā manasendriyairvā buddhyātmanāvā prakṛtyai svabhāvāt karomi yadyat sakalaṃ parasmai śrīmannarāyaṇāyeti samarpayāmi |**

**oṃ pūrṇamadaḥ pūrṇamidaṃ pūrṇāt pūrṇamudacyate |**
**pūrṇasya pūrṇamādāya pūrṇameva avaśiṣyate ||**

**oṃ śāntiḥ śāntiḥ śāntiḥ ||**